International Journal of Applied Research 2021; 7(8): 216-218




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(8): 216-218
www.allresearchjournal.com
Received: 13-06-2021
Accepted: 18-07-2021

**रतीश कुमार मिश्र**
उफरदाहा, भाया – नेहरा,
जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**रतीश कुमार मिश्र**
उफरदाहा, भाया – नेहरा,
जिला–दरभंगा, बिहार, भारत

# व्यवहारविषये विज्ञानेश्वरावदानमहत्वञ्च

**रतीश कुमार मिश्र**

**प्रस्तावनाः**

धर्मशास्त्रे मुख्यतमो विषयो भवति व्यवहारभागः। व्यवहारभागः इति कथनेन मुख्यतः राज्ञः विचारविभाग इति ज्ञायते। यत्र अष्टादशव्यवहारपदानि आलोचितानि दरीदृश्यन्ते। तेषां पदानां विमर्शात्प्राक् व्यवहारस्थापनाविषये कानिचित् वस्तूनि व्यवहार–सम्बन्धानि पर्यालोचितानि प्राप्यन्ते। मिताक्षराकारेण विज्ञानेश्वरेण तत्सर्वं विस्तृत–भावेन व्यवहाराध्यायस्य प्रारम्भे निम्नोक्तविषयाकारेण समाकलितम्। यथा– साधारण– व्यवहारमातृका प्रकूरणम्। तस्मिन् प्रकरणे[1] व्यवहार–दर्शनाय सभासदां योग्यता, राज्ञः अनुपस्थितौ तत्कार्य– निर्वाहार्थं[2] धर्म–ब्राह्मणस्य नियुक्तिः धर्मविरुद्धानां सभासदां[3] दण्डप्रदानं, व्यवहारस्य विषयाः, व्यवहारस्य कार्यं, विवादस्य[4] चत्वारः भेदा इति एते विषयाः साधारणव्यवहारमातृका प्रकरणे वर्णिताः दृश्यन्ते।

द्वितीयं प्रकरणं भवति असाधारणव्यवहारमातृका– प्रकरणम्। अत्र निम्नोक्ताः विषयाः सुगुम्फिताः दृश्यन्ते। यथा– प्रत्यभियोगः, स्तेयसाहसे चापरोध अभिप्रयोगः, अभियोगस्य संगोपने दण्डप्रदानं, तात्कालिकनिर्णयः, दुष्टसाक्षिणां[5] लक्षणं, साक्षिणां क्रमः, सपणविवादस्य निर्णयः, धर्मशास्त्रवचनयोः[6] विरोधे प्राम्यण्यग्रहणं, लिखित–भुक्ति– साक्ष्यप्रमाणानां विचारः, अन्यद्वारा भोग्यस्य वस्तुनः अधिकारविमर्शः, लेख्यभोग्ययोः प्रमाण्यविचारः, आगमोपयोगः, व्यवहारदर्शननिमित्त– मन्येसदस्याः, व्यवहारस्य पूर्णविचारः, असिद्धव्यवहारः, नष्टस्य वस्तुनः विषये व्यवहारः, चौरहस्तादागतस्य धनस्य विचार इत्येते विषयाः विज्ञानेश्वरेण असाधारण व्यवहारमातृका प्रकरणे समाकलिताः।

**ऋणादानप्रकरणम्–**

ऋणादानप्रकरणे[7] वृद्धेः परिमाणं ऋणस्य प्रत्यर्पणम्, ऋणस्या–प्रत्यर्पणे राजाद्वारा ऋणप्रत्यर्पणस्य राज्ञः कियानंशविचारः, ऋणस्याप्रत्यर्पणे[8] वर्णानुसारं कार्य्यवृद्धेः स्थितिविचारः, अधमर्णस्य मरणे ऋणप्रत्यर्पणस्य विधिः अप्रत्यर्पितस्य ऋणस्य पुनः ऋणग्रहणं, स्त्रीद्वारा ऋणग्रहणं, स्त्रीद्वारा देयं ऋणं, पुत्रपौत्रद्वारा देयमृणं प्रतिभाव्यस्यार्थः, अनेकप्रतिभूद्वारा ऋणस्य प्रत्यर्पणं, बन्धस्य वस्तुनः प्रणाशावधिः, वृद्धेरप्रदाने किं कार्यं आधिनाशाऽनन्तरं पुनराधेः व्यवस्था, उत्तमर्णेन बन्धस्य वस्तुनः अप्रदाने दण्डव्यवस्था, भोग्यस्याधेः नियमाः, उपनिधेः परिभाषा, उपनिधेः प्रत्यर्पण–नियमाः, उपनिधिभोगेदण्डव्यवस्था इत्येते विषयाः वर्णिताः[9]।

**साक्षीप्रकरणम्–**

प्रकरणेऽस्मिन् साक्षिणः स्वरूपनिर्णयः, साक्षिभेदास्तथा योगयताश्च, साक्षिणां नियमाः, प्राड्विवाकद्वारा साक्षिणां प्रबोधनम्, कूटसाक्ष्यस्य दण्डव्यवस्था, साक्षिणां विरोधे व्यवस्था, साक्षिणां साक्ष्ये सत्यताविचारः, साक्षिणामसत्यभाषणे प्रायश्चित्तम्। इत्येते विषयाः प्रकरणेऽस्मिन् विचारिताः दृश्यन्ते।

**लेख्यप्रकरणम्–**

लेख्यस्य[10] भेदाः, लेख्ये व्यक्तेः तथा समयस्य विस्तृतं विवरणं, ऋणदातुस्तथा ऋणिकस्य तथा च साक्षीलेखकानां हस्ताक्षरं, स्वयं–लिखितलेख्यः, लेख्यऋणस्य प्रत्यर्पणकालः, पुनर्लेख्यस्यावश्यकता, संदिग्धलेख्यस्य शुद्धिः, ऋणप्रत्यर्पणानन्तरं पुनः लेख्यम्।

**दिव्यप्रकरणम्–**

प्रकरणेऽस्मिन् दिव्यं प्रमाणं, तस्य भेदाः, दिव्यप्रयोगस्य के पात्राः कालश्च, तुलादिव्यस्य के योग्याः, तप्तकालः, विषदिव्यं, तुलादिव्यं, एतेषां स्थितिविचारः, तुलादिव्यस्य प्रयोगविधिः मन्त्रश्च, अग्निदिव्यस्य प्रयोगविधिः मन्त्रश्च, जलदिव्यस्य प्रयोगविधिः मन्त्राश्च, कोशविधिः, तझडुलविधिः, तप्तमासकविधिः, धर्माधर्म– विधिरिति, दिव्यप्रकरणेन सह ऋणादानस्य प्रकरणं समाप्तं भवति।

विवादपदस्य पर्यालोचनप्रसंगे मिताक्षराकारेण विज्ञानेश्वरेण ऋणादानस्य अनन्तरं दायभागस्य विवादपदस्यालोचनं विहितम्। तस्मिन् प्रकरणे विषयस्यास्य महत्त्वं दृष्ट्वा गाम्भीर्यपूर्णेन केचन–विशिष्टविषयाः पर्यालोचिताः। आदौ दायशब्दस्यार्थः[11] दायस्य द्वौ भेदौ, पिताद्वारा समविषयमभागयोः विचारः, पित्रोः मरणानन्तरं विभागस्य विधिः, कानिअविभाज्यधनानि[12], अविभाज्यधनस्यापवादः, पौत्रस्यांशः, पितामहधने अंशविचारः, धनप्राप्तौ मातुरधिकार, असंस्कृतानां भ्रातृणां ज्येष्ठस्य संस्कारदायित्वमसवर्णानां पत्नीनां पुत्राणाञ्च दायाधिकारः, गुप्तस्य धनस्व्य विभागः, नियोगोत्पादितस्य पुत्रस्य दायाधिकारः, औरस–पुत्रिकापुत्रयोः प्राधान्यविचारः, गूढजकानीनयोस्तथापौनर्भव–दत्तकयोः तथा च त्क्रीतकृत्रिमपविद्धपुत्राणां दायाधिकारः, दासीपुत्रास्यांश–विचारः, पुत्रहीनस्य धनस्याधिकारिणः, वानप्रस्थयतिब्रहाचारिणां धनानि तेषां धनस्याधिकारिणः, संसृष्टिधनस्य विचारः, केऽनशाः, अनंशा–नामपवादः, क्लीवादीनां पत्नीनां स्थितिः, स्त्रीधनानि तेषाञ्च स्त्रीधनाना– मुत्तराधिकारिणः, वाग्दत्तायाः धनं तस्य हरणे दण्डव्यवस्था, पतिद्वारा स्त्रीधनस्याप्रत्यर्पणे विचारः, गृहस्य तथा योगक्षेमादीनां विभागप्रकारः एते विषयाः दायभागप्रकरणे वर्णिताः सन्ति।

**सीमाविवादप्रकरणम्–**

तत्र प्रकरणे सीमाविवादस्य[13] निर्णयः, सीमानिर्णयस्य साधनानि, ग्रामसामन्तानां साक्ष्यग्रहणं, सीमाविवादे मिथ्यावादिनां दण्डव्यवस्था, मर्य्यादा– भंगे दण्डव्यवस्था, क्षेत्रादिवलात्कारग्रहणे दण्डव्यवस्था परक्षेत्रे कूपसेतुप्रभृतीनां निर्माणे दण्डव्यवस्था, क्षेत्रस्य कर्षणादिव्यवस्थाः, एतादृशाः विषयाः प्रकरणेऽस्मिन् पर्य्यालोचिताः सन्ति।

**स्वामिपालविवादप्रकरणम्–**

प्रकरणेऽस्मिन् परस्य क्षेत्रे चारणे दण्ड–व्यवस्था, अपराध–स्याधिक्ये दण्डद्वैगुण्यं, स्वामिपालयोः दण्डव्यवस्था, विशेषस्थले दण्डस्यापवादः, स्वामिपालयोः दायित्वं, पशोः विनाशे पालस्य दण्डव्यवस्था चारणभूमिनिरूपणं, चारणस्य भूमेः परिमाणमित्येते विषयाः स्वामिपालविवादप्रकरणे निवेशिताः।

**अस्वामिविक्रयप्रकरणम्–**

अस्वामिविक्रयस्य किं लक्षणं[14], वस्तुतः स्वल्पे मूल्ये क्रयनिषेधः, अपहृतस्य वस्तुतः विक्रयनिषेधः, नष्टस्य वस्तुनः राज्ञे प्रत्यर्पणं, अपहृतस्य पशोः प्राप्यनन्तरं राज्ञे देयं धनमेवं अस्वामिविक्रयप्रकरणे विषयाः समालोचिताः।

**दत्ताप्रदानिकप्रकरणम्–**

दत्ताप्रदानिकस्य स्वरूपं[15], दत्तानपाकर्मणः स्वरूपं, तेषां भेदाः, दानस्य भेदाः परिमाणञ्च, दानयोग्यनिवस्तूनि, दानस्य[16] स्थाननिरूपणं, दत्तादत्तयोः स्वरूपविमर्शः, अदत्तस्य प्रकारः एते विषयाः प्रकरणेऽस्मिन् वर्णिताः सन्ति।

**क्रीतानुशयप्रकरणम्–**

तत्र क्रीतानुशयस्य[17] स्वरूपं, क्रीतानुशयाऽनन्तरं प्रत्यर्पणस्य निर्णयः, बीजादीनां क्रये परीक्षाविधिः, सुवर्णादीनां धातूनां परीक्षाविधिः, कार्पासादीनां वस्त्राणां तथा च कम्बलानां, पलादिनिर्णयः, रञ्जकस्य प्रत्यर्पणकाले परिमाणविचारः, द्रव्यनाशे दण्डव्यवस्था इति प्रकरणस्यास्य विषयाः भवन्ति।

**अभ्युपेत्याशुश्रूषाप्रकरणम्–**

अभ्युपेत्याशुश्रूषायाः स्वरूपविमर्शः[18], पञ्चप्रकाराः शुश्रूषकाः, चत्वारः कर्मकाराः, त्रयः भृतकाः दासानां[19] भेदाः दासत्वस्य मुक्तिकालः, सन्यासच्युतः जनः, राज्ञः दासत्वप्रसंग, स्वामिवर्णात् भृत्यः निम्नवर्णः स्यात्। अन्तेवासिनां कः धर्म इति प्रकरणेऽस्मिन् सर्वमालोचितम्।

**संविद्व्यतिक्रमप्रकरणम्–**

संविद्व्यतिक्रमस्य लक्षणं, धर्मरक्षणाय ब्राह्मणस्य नियुक्तिः, समयस्य तथा धर्मस्य पालनाय राज्ञः योगदानं, गणानां नियमाः, समुहानां कार्यार्थ जनप्रेषणं कार्यचिन्तकस्य लक्षणं, श्रेणी–पूग–पाखण्डिगणानां नियमा इति प्रकरणस्यास्यान्तर्गताः विषयाः।

**वेतनादानप्रकरणम्–**

प्रकरणस्यास्य महत्वं नाद्याऽपि विलुप्तमपितु विशिष्टं स्थानं भजते। अतएव प्राचीनकालादारभ्यायावधि विषयस्यास्य महत्त्वं वैशिष्ट्यमुपयोगित्वञ्च समाजे दरीदृश्यते। एतदर्थ धर्मशास्त्रकाराः व्यवहारास्यास्य स्थापनप्रसंगे विषयेऽस्मिन् गभीरं रेखापातं कुर्वन्ति। व्यवहारपदस्यास्य वेतनादानपदस्य[20] स्वरूपं परिप्रकाशयन्ति। वेतनं गृहीत्वा, कर्म त्यक्त्वा तत्र कीदृशः दण्डः, कर्मकारयित्वा वेतनाप्रदाने कार्यं करिष्यामीति स्वीकारं कृत्वाऽकरणे भृत्येभ्यः कर्मणः लाभांशप्रदानं एवमेवविषयेऽस्मिन् भृत्यः स्वामिनः वेतनसम्बन्धी यः व्यवहारः स एवात्र गृह्यते।

**द्यूतसमाह्वयप्रकरणम्–**

मन्वादयः महाधर्मशास्त्रकाराः प्रकरणेऽस्मिन् सर्वदा आलोचयन्ति। मनुना द्यूतसमाह्वयं च प्रकाशतास्कर्य्यमितिकृत्वा बहुनिनिछतम्। एतयोः द्वयोः विनाशे राजा यथा संयतशीलः स्यात्तदर्थं मनुर्थं उपदिशति मिताक्षरायामपि प्रकरणेऽस्मिन् बहुधा आलोचना जाता। यूतसमाह्क्ययोः स्वरूपविमर्शः[21], अत्र जयपराजयनिर्णयः, द्यूताधिकारिणः कर्म, धूताध्यक्षनियुक्तिः[22], निषेधे सत्येऽपि द्यूते दण्डव्यवस्था इत्यादि प्रकरणेऽस्मिन्नागच्छति। अत्र यः कोऽपि विवादः ससर्वः द्यूतसमाह्वयप्रकरणे समागच्छति[23]।

**सन्दर्भ ग्रंथ सूची :**


1. व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह।
   धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितैः।।
   श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।
   राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः।। या0 स्मृ0 व्यव 1/2
2. अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु।
   सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्।। याज्ञ0 स्मृ0 व्यव0 3
3. (क) रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः।
   सभ्याः पृथक्पृग्दिण्ड्या विवादाद्द्विगुणं दमम्।। या0 स्मृ0 व्यव0 4
   (ख) ''षड्भिः परिहार्यो राज्ञाऽवध्यश्चाबन्ध्यश्चा दण्ड्यश्चाबहिष्कार्यश्च अपिरवाथापरिहार्यश्च'' – गौ0 8. 92–93
4. अभियोस्तु विज्ञेयः शंकातत्त्वाभियोगतः।
   शंकाऽसतां तु ससर्गात्तत्वं होदाभिदर्शनात्।। नारद 9/27
5. देशाद्देशान्तरं याति सृक्किणी परिलेढ़ि च।
   ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च।।
   परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते।
   वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि ।।
   स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिरू।
   अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्त्तितः।।
   या0 स्मृ0 व्यव0 13–14–15
6. ऋणं देयमदेयं च येन यथा च यत्।
   दानग्रहणधर्माभ्यामृणादानमिति स्मृतम्।। नारद 1/1/4
7. ऋणं देयमदेयं च येन यत्र यथा च यत्।
   दानग्रहण धर्माभ्यामृणादानमिति स्मृतम्।। नारद 1/1/4

8. (क) समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्धयति। मनु. स्मृ. 8/74
(ख) संदिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः।
दुष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तदर्शनम्।। नारद–टोडरानन्दे 4/247
9. एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः।
कृतः पञ्चविधो ज्ञेयः षड्विधीऽकृत उच्यते।। नारद 9/178
10. लेख्यं तु द्विविधं ज्ञेयं स्वहस्ताऽन्यकृतं तथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः।। नारद 1/137
11. दायशब्देन यद्वनं स्वामिसम्बन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते।
स च द्विविधः – अप्रतिबन्धः, सप्रतिबन्धश्च ।। या. स्मृ. व्य. पृ. 216
12. विभागोऽर्थस्य पित्र्यरय तनयैर्यत्र कल्प्यते।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः।।
ना. 13/1
13. पितुद्रव्याविरोधेन यदन्यत्स्वयमर्जितम्।
मैत्रामौद्वाहिकं चैव दायावानां न तद्भवेत्।।
क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेततु यः।
दायादेभ्यो न तद्दथाद्विधया लब्धमेव च।।
या. स्मृ. 118, 119
14. अध्यग्न्यध्यवाहनिकं दत्तं च प्रीतिकर्मणि।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्।।
मनु. 9/194
15. सीम्नो विवादे क्षेत्रास्य सामन्ताः स्थविरादयः।
गोपाः सीमाकृषाणा ये सर्वे च वनगोचराः।।
नयेयुरेते सीमानां स्थलांगारतुषद्रुमैः।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरूपलक्षिताम्।।
या. स्मृ. व्य. 150–151
16. निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा।
विक्रीयतेऽसमक्षं यत्स ज्ञेयोऽस्वामिविक्रयः।।
ना. स्मृ. 7/1
17. दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्।।
ना. स्मृ. 4/1
18. अथ देयमदेयं च दत्तं वाऽदत्तमेव च।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः।।
ना. स्मृ. 4/2
19. अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते।
अशुश्रूषाभ्युपेत्यैतद्विवादपदमच्यते।।
ना. स्मृ. 5/1
20. गृहजातस्तथा क्रीतो लब्धे दायादुपागतः।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः।।
मोक्षितो महतश्चर्णायुद्धप्राप्तः पणे जितः।
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः।
विक्रता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः।।
ना. स्मृ. 5/26
21. पाखण्डिनैगमादीनां स्थितिः समय उच्यते।
समयस्यानपाकर्म तद्विवादपदं स्मृतम्।।
नारदस्मृतिः
22. भृत्यानां वेतनस्योक्तो दानादानविधिक्रमः।
वेतनस्यानपाकर्म तद्विवादपदं स्मृतम्।।
ना. स्मृ. 6/1
23. (क) अक्षबध्नशलाकाद्यैर्देवनं जिहाकारितम्।
पणक्रीड़ावयोभिश्च पदं द्यूतसमाह्वयम्।।
ना. स्मृ. 16/1
(ख) अप्राणिभिर्यात्क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः।।
मनु. स्मृ. 9/223